## लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् । (१५४/३१३४)

लषादिभ्यो धातुभ्यः [1]तच्छीलादिषु कर्तृषु उकञ् प्रत्ययो भवति । [2]अपलाषुकं वृषलसङ्गतम् । प्रपातुका [3]गर्भा भवन्ति । [4]उपपादुकं सत्त्वम् । उपस्थायुका एनं [5]पशवो भवन्ति । प्रभावुकमन्नं [6]भवति । [7]प्रवर्षुकाः पर्जन्याः । आघातुकं [8]पाकलिकस्य मूत्रम् । [9]कामुका एनं स्त्रियो भवन्ति । आगामुकं वाराणसीं रक्ष आहुः । [10]किशारुकं तीक्ष्णमाहुः ॥

## जल्पभिक्षकुट्टलुण्टवृङः षाकन् । (१५५/३१३५)

जल्पादिभ्यो धातुभ्यः [11]तच्छीलादिषु कर्तृषु षाकन् प्रत्ययो भवति । षकारो ङीषर्थः । जल्पाकः । भिक्षाकः । [12]कुट्टाकः । लुण्टाकः । वराकः । वराकी ॥

## प्रजोरिनिः । (१५६/३१३६)

प्रपूर्वाज् जवतेः[13] तच्छीलादिषु कर्तृषु इनिः प्रत्ययो भवति । प्रजवी, प्रजविनौ[14] ॥

## जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च । (१५७/३१३७)

'[15]जि जये' (धा. पा. ५६१) । '[16]दृङ आदरे' (धा. पा. १४१२) । 'क्षि क्षये[17]' (धा. पा. २३६), 'क्षि निवासगत्योः' (धा. पा. १४०८) इति द्वयोरपि ग्रहणम् । प्रसू इति 'षू प्रेरणे' (धा. पा. १४०९) इत्यस्य ग्रहणम् । जिप्रभृतिभ्यो धातुभ्यः इनिः प्रत्ययो भवति तच्छीलादिषु [18]कर्तृषु । जयी । [19]दरी । क्षयी । विश्रयी । अत्ययी । वमी । अव्यथी । अभ्यमी । परिभवी । प्रसवी ॥

## स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् । (१५८/३१३८)

'स्पृह ईप्सायाम्' (धा. पा. १८७२), 'ग्रह ग्रहणे' (धा. पा. १९००), 'पत गतौ' (धा. पा. १८६२), चुरादौ [20]अदन्ताः पठ्यन्ते । 'दय [21]दानगतिरक्षणेषु' (धा. पा. ४८१) । 'द्रा कुत्सायां गतौ' (धा. पा. १०५५), निपूर्वस्तत्पूर्वश्च, तदो नकारान्तता च निपात्यते । 'डुधाञ्' (धा. पा. १०९३) श्रत्पूर्वः । एतेभ्यस्त[22]-च्छीलादिषु कर्तृषु आलुच् प्रत्ययो भवति । स्पृहयालुः । गृहयालुः । पतयालुः । दयालुः । निद्रालुः । तन्द्रालुः । श्रद्धालुः ।

[२८१] आलुचि[23] शीङो ग्रहणं कर्तव्यम् । (म. भा. २. १३४)

शयालुः ॥

---

1. तच्छीलादिषु कर्तृषु नास्ति अ. क. ह. 2. अभिलाषुकं वृषलसंगमम् ग. 3. गर्भा नास्ति ब, भवन्ति नास्ति फ. 4. उपपादुकः सत्त्वः अ. क. फ. 5. सत्त्वा अ. 6. भवति नास्ति फ. 7. प्रवर्षुकः पर्जन्यः फ. ह. 8. पाकलिकस्य सूपम् फ, पाकतिलस्य अ. ब, कापालिकस्य शूलम् इ. ग. 9. कारका ह. 10. शारुकः हन्ता अ. 11. तच्छीलादिषु नास्ति ह. 12. कुट्टाकः नास्ति फ. 13. धातोः इत्यधिकम् अ. फ, तच्छीलादिषु नास्ति अ. क. ह. 14. प्रजविनः इत्यधिकम् अ. ब. क. ड. फ. ह. 15-16. नास्ति ह. 17. इति इत्यधिकम् ह. 18. कर्तृषु नास्ति फ. ह. 19. दरी नास्ति अ. क. 20. अदन्तोऽपि उच्यते ब. क, पठ्यन्ते नास्ति फ. 21. रक्षणहिंसादानेषु फ. 22. सप्तधातुभ्यः इत्यधिकम् अ. 23. प्रत्यये इत्यधिकम् अ.